स्वाध्यायेनैव ब्राह्मणः। कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते। क्षत्रियस्यापि यो धर्मस्तन्ते वक्ष्यामि भारत!। दद्याद्राजन्न याचेत यजेत न च याजयेत्। नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्। नित्योद्युक्तो दस्युबधे रणे कुर्य्यात् पराक्रमम्। ये तु क्रतुभिरीजानाः श्रुतवन्तश्च भूमिपाः। य एवाहवजेतारस्त एषां लोकजित्तमाः। अविक्षतेन देहेन समराद्यो निवर्त्तते। क्षत्रियो नास्य तत् कर्म प्रशंसन्ति पुराविदः। एवं हि क्षत्रबन्धूनां मार्गमाहुः प्रधानतः। नास्य कृत्यतमं किञ्चिदन्यद्दस्युनिवर्हणात्। दानमध्ययनं यज्ञो राज्ञां क्षेमं विधीयते। तस्माद्राज्ञा विशेषेण योद्धव्यं धर्ममीप्सता। स्वेषु धर्मेष्ववस्थाप्य प्रजाः सर्व्वा महीपतिः। धर्मेण सर्वकृत्यानि शमनिष्ठानि कारयेत्। परिनिष्ठितकार्य्यस्तु नृपतिः परिपालनात्। कुर्य्यादन्यन्न वा कुर्य्यादैन्द्रो राजन्य उच्यते। वैश्यस्यापि हि यो धर्मस्तन्ते वक्ष्यामि शाश्वतम्। दानमध्ययनं यज्ञः शौचेन धनसञ्चयः। पितृवत् पालयेद्वैश्यो युक्तः सर्व्वान् पशूनिह। विकर्म तद्भवेदन्यत् कर्म यत् स समाचरेत्। रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददौ पशून्। ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः। तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्। षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं हरेत्। लब्धाच्च सप्तमं भागं तथाऽष्टङ्गे कलाऽखुरे। शस्यानि सर्ववीजानामेषा सांवत्सरी भृतिः। न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति। वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन। शूद्रस्यापि हि यो धर्मस्तन्ते वक्ष्यामि भारत!। प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत्। तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते। तेषां शुश्रूषणाच्चैव महत् सुखमवाप्नुयात्। शूद्र एतान् परिचरेत्त्रीन् वर्णाननुपूर्वशः। सञ्चयांश्च न कुर्व्वीत जातु शूद्रः कथञ्चन। पापीयान् हि धनं लब्ध्वा वशे कुर्य्याद्गरीयसः। राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः। तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्। अवश्यभरणीयो हि वर्णानां शूद्र उच्यते। छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च। यातयामानि देयानि शूद्राय परिचारिणे। अधार्य्याणि विशीर्णानि वसनानि द्विजातिभिः। शूद्रायैव प्रदेयानि तस्य धर्मधनं हि तत्। यश्च किञ्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत्। कल्प्यां तस्य तु तेनाहुर्वृत्तिं धर्मविदो जनाः। देयः पिण्डोऽनपत्याय भर्त्तव्यौ वृद्धदुर्बलौ। शूद्रेण तु न हातव्यो भर्त्ता कस्याञ्चिदापदि। अतिरेकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये। न हि स्वमस्ति शूद्रस्य भर्तृहार्य्यधनो हि सः। उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च भारत!। स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते। तस्माच्छूद्रः पाकयज्ञैर्यजेताव्रतवान् स्वयम्। पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम्। शूद्रः पैजवनो नाम सहस्राणां शतं ददौ। ऐन्द्राग्न्येन विधानेन दक्षिणामिति नः श्रुतम्। यथा हि सर्ववर्णानां यज्ञस्तस्यैव भारत!। अग्र्यः सर्वेषु यज्ञेषु श्रद्धायज्ञो विधीयते। दैवतं हि महच्छ्रद्धा पवित्रं यजताञ्च यत्। दैवतं हि परं विप्राः स्वेन स्वेन परस्परम्। अयजन्निह सत्रैस्तैस्तैः कामैः समाहितैः। संसृष्टा ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टयः। देवानामपि ये देवा यद्ब्रूयुस्ते परं हितम्। तस्माद्वर्णैः सर्वयज्ञाः संसृज्यन्ते न काम्यया। ऋग्यजुःसामवित्पूज्यो नित्यं स्याद्देववद्द्विजः।”

सङ्कीर्णजातिधर्म्मस्तु मन्वाद्युक्तो जातिशब्दे दर्शितः “उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः” गीता।

**जाति(ती)पत्री** स्त्री जातेः(त्याः) जातीफलस्य पत्री गौरा० ङीष्। (जायत्री) ख्याते गन्धद्रव्यभेदे “जातीफलस्य त्वक् प्रोक्ता जाति(ती) पत्री भिषग् वरैः। जाति(ती) पत्री लघुः स्वादुः कटूष्णा रुचिवर्णकृत्। कफकासवमिश्वासतृष्णाकृमिविषापहा” भावप्र०।

**जाति(ती)फल** न० जातिः(ती) तन्नामकं फलं, ६त० वा। (जायफल) गन्धद्रव्यभेदे हेमच०।

**जातिबाधक** त्रि० ६त०। जातेर्बाधके प्राचीननैयायिकोक्ते व्यक्तेरभेदादौ स च जातिशब्दे दर्शितः।

**जातिब्राह्मण** पु० जात्या जन्मना ब्राह्मणः। तपःस्वाध्यायरहिते ब्राह्मणे। “तपः श्रुतञ्च योनिश्च त्रयं ब्राह्मण्यकारणम्। तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः” शब्दार्थचि० धृतवाक्यम्।

**जातिभ्रंश** न० पापभेदे। तत्स्वरूपप्रायश्चित्ते मनुनोक्ते प्रा० वि० व्यवस्थापिते च यथा।

“तत्र मनुः “ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः। जैह्म्यञ्च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम्”। “जातिभ्रंशकरं कर्म्म कृत्वान्यतममिच्छया। चरेत् सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया”। रुजः कृत्वा पीड़ाकरणम्। अघ्रेयं